# Charamamantraramayanam

# ચરમમન્ત્રરામાયણં

## Document Information

Text title : Charamamantraramayanam

File name : charamamantrarAmAyaNaM.itx

Category : raama, rAmAnanda, mantra

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2024

*sanskritdocuments.org*

# Charamamantraramayanam

## ચરમમન્ત્રરામાયણં

શ્રિયાનન્દં ગુરું નત્ત્વા રામં બોધાયનં તથા ।
કુર્વે શ્રીચરમમન્ત્રરામાયણં હિ મુક્તિદમ્ ।
સર્વજ્ઞઃ સર્વશક્તિશ્ચ સર્વેશઃ સર્વકારણમ્ ।
રામઃ સર્વાવતારી હિ કૌશલ્યાનન્દનોઽભવત્ ॥ ૧॥

કૃતં સર્વં જગદ્ યેન સ્વેક્ષણાચ્ચ સ્વદેહતઃ ।
તદ્ બ્રહ્મધર્મરક્ષાર્થમયોધ્યાયામજાયત ॥ ૨॥

દેવપ્રાર્થનયા રામો દાશરથિર્બભૂવ હિ ।
બાલલીલા કૃતા રમ્યા રામેણ સર્વસૌખ્યદા ॥ ૩॥

વશિષ્ઠાત્ પઠિતાઃ સર્વા વિદ્યા રામેણ ધીમતા ।
રામોઽથ યજ્ઞરક્ષાયૈ વિશ્વામિત્રેણ યાચિતઃ ॥ ૪॥

પ્રભાવાચ્ચ મહાન્ રામો બાલોઽપિ તાટકામહન્ ।
હત્ત્વા રાક્ષસસઙ્ઘાંશ્ચ મુનેર્યજ્ઞં રરક્ષ હિ ॥ ૫॥

પત્યા શિલા કૃતાઽહિલ્યા પાદધૂલ્યા હિ રામતઃ ।
ચૈતન્યં પ્રાપિતા રામં તુષ્ટાવ શ્રદ્ધયા ભૃશમ્ ॥ ૬॥

નાથશ્ચ સર્વલોકાનાં શ્રીરામો મૈથિલે પુરે ।
ભઙ્ક્ત્વા માહેશ્વરં ચાપમુદૂહે મૈથિલીં શુભામ્ ॥ ૭॥

યતઃ સ્વસ્ય ધનુઃ કૃષ્ટં દૃષ્ટ્વા ચ વિસ્મયં ગતઃ ।
સંસ્તુત્ય ભાર્ગવો રામં સ્વેષ્ટદેશં જગામ તત્ ॥ ૮॥

તસ્મૈ હિ સ્વપદં દાતુમિયેષ કોશલેશ્વરઃ ।
ગતો રામો વનં કિન્તુ કૈકેયીવરયાચ્ચયા ॥ ૯॥

વાસં વન્યં ગતે રામે રાજા સ્વર્ગં જગામ હિ ।
નૈચ્છત્તુ ભરતો રાજ્યમાજ્ઞમો ગુરુણાપિ ચ ॥ ૧૯॥

ઇતિ રામોઽનુનીતોઽપિ ભરતેન મહાત્મના ।
નૈચ્છદ્ રાજ્યં દદૌ કિન્તુ પાદુકે ભરતાય હિ ॥ ૧૨॥

ચક્રે ચ ભરતેનાપિ પાદુકારાધનં શુભમ્ ।
પાદુકાધીનતાં ગત્વા રામરાજ્યં રરક્ષ સઃ ॥ ૧૩॥

યાતશ્ચ દણ્ડકારણ્યં ચિત્રકૂટાદ્ધિ રાઘવઃ ।
રક્ષિતું ઋષિસઙ્ઘં ચ રામેણ રાક્ષસા હતાઃ ॥ ૧૪॥

ચકાર પઞ્ચવટ્યાં હિ વાસં ગોદાવરીતટે ।
રામેચ્છયાઽનુજેનાથ શૂર્પણખાવિરૂપિતા ॥ ૧૫॥

તેનાગતાઁશ્ચ યુદ્ધાય ખરાદિકાન્ હિ રાક્ષસાન્ ।
નિજઘાન રણે રામો દારુણાન્ ઋષિમક્ષકાન્ ॥ ૧૬॥

અથ જગામ મારીચં રાવણો રાક્ષસાધિપઃ ।
હૈમં મૃગં ચ તં કૃત્વા સ્વયં સીતામપાહરત્ ॥ ૧૭॥

ભયાત્ પલાયિતં રામો હતવાન્ કાઞ્ચનં મૃગમ્ ।
સલક્ષ્મણઃ કુટીં ગત્વા સીતાર્થં વિલલાપ ચ ॥ ૧૮॥

યં વિદિત્વા ગુરોર્લોકાસ્તરન્તિ શોકસાગરમ્ ।
સ એવ ભગવાન્ રામઃ શુશોચ નરલીલયા ॥ ૧૯॥

યં વિદિત્વા ગુરોર્લોકાસ્તરન્તિ શોકસાગરમ્ ।
સ એવ ભગવાન્ રામઃ શુશોચ નરલીલયા ॥ ૧૯॥

સર્વથાઽઽત્માર્પકં ગૃધ્રં મુક્તિં દત્ત્વા ચ રાઘવઃ ।
સાનુજો વાયુપુત્રેણ સુગ્રીવં ચાથ સઙ્ગતઃ ॥ ૨૦॥

સર્વથાઽઽત્માર્પકં ગૃધ્રં મુક્તિં દત્ત્વા ચ રાઘવઃ ।
સાનુજો વાયુપુત્રેણ સુગ્રીવં ચાથ સઙ્ગતઃ ॥ ૨૦॥

વહ્નિં ચ સાક્ષિણં કૃત્વા સુકણ્ઠમિત્રતાં ગતઃ ।
હત્વા ચ વાલિનં રામો સુગ્રીવં કૃતવાન્ નૃપમ્ ॥ ૨૧॥

ભૂમિજાન્વેષણાયાથ પ્રેષિતા ઋક્ષવાનરાઃ ।
લઙ્કાયાં સા હિ દૃષ્ટાથ લઙ્કા દગ્ધા હનૂમતા ॥ ૨૨॥

તેભ્યઃ સહાગતેભ્યશ્ચ દત્ત્વાઽઽનન્દં ચ મારુતિઃ ।
સન્દેશં ભૂમિજાયાશ્ચ શ્રીરામાય ન્યવેદયત્ ॥ ૨૩॥

યો રાઘવો ભવાબ્ધેશ્ચ તારકો વિશ્રુતઃ શ્રુતૌ ।
અશ્મસેતું સ એવાબ્ધૌ કૃતવાન્ વિસ્મયાવહમ્ ॥ ૨૪॥

દદૌ વિભીષણાય સ્વં શ્રિતાય રાઘવોઽભયમ્ ।
સર્વેભ્યશ્ચાભયં રામો દત્તે સકૃત્ પ્રપત્તિતઃ ॥ ૨૫॥

દામ્ભિકં રક્ષસાં નાથં રાવણં રાઘવોઽવધીત્ ।
લઙ્કેશં કૃતવાન્ રામો સ્વપ્રપન્નં વિભીષણમ્ ॥ ૨૬॥

યે મૃતાસ્તાંશ્ચ સઞ્જીવ્ય સુરૈર્બ્રહ્માદિભિઃ સ્તુતઃ ।
સ્વજનૈઃ પુષ્પકેનાથ રામોઽયોધ્યામગાત્ પુનઃ ॥ ૨૭॥

તદ્ રામાગમનં પ્રોક્તં ભરતં શ્રીહનૂમતા ।
શ્રુત્વા સમાગતાન્ સર્વાનાશ્લિક્ષદ્ રાઘવઃ પ્રભુઃ ॥ ૨૮॥

વ્રતં સ્વજનકાઙ્ક્ષં પૂર્ણં કૃત્વા હિ રાઘવઃ ।
ઉરરીકૃતવાન્ રાજ્યં સર્વનેત્રમહોત્સવમ્ ॥ ૨૯॥

તતં દૃષ્ટ્વા પુષ્પવૃષ્ટિર્હિ કૃતા હર્ષાત્ સુરૈઃ શુભા ।
રામરાજ્યે પ્રજા સર્વા લોકત્રયં મુમોદ ચ ॥ ૩૦॥

મહતશ્ચ મહીયાન્ યશ્ચાણીયાનણુતોઽપિ યઃ ।
વન્દે તં રાઘવં બ્રહ્મ વ્યાપકં શ્રિતમુક્તિદમ્ ॥ ૩૧॥

મહોદધિર્ગુણાનાં યો નિર્દોષઃ સુષમાકરઃ ।
અમોઘાર્ચાસ્તવં વન્દે તં રામં વેદવેદિતમ્ ॥ ૩૨॥

શ્રિયાનન્દાર્યશિષ્યેણ હર્યાનન્દેન નિર્મિતમ્ ।
ભવતાચ્ચરમમન્ત્રરામાયણં સુખપ્રદમ્ ॥

ઇતિ પ્રતિપક્ષિભયઙ્કુર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધશિરોમણિ પ્રણીતં ચરમમન્ત્રરામાયણં સમ્પૂર્ણમ્ ।

Proofread by Parashara Ranganathan

*Charamamantraramayanam*

pdf was typeset on January 28, 2024

Please send corrections to *sanskrit@cheerful.com*